संस्कृतसामान्यम् । उपशास्त्री - I 14-08-2020

अनिवार्यपत्रम् । हितोपदेशः । श्लोकव्याख्या ।

"यो ध्रुवाणि परित्यज्य, अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति, अध्रुवं नष्टमेव हि ॥"

**सन्दर्भः →** श्लोकोऽयं श्रीनारायणपण्डितेन विरचितस्य हितोपदेशग्रन्थस्य मित्रलाभात् भागात् उद्धृतोऽस्ति ।

**प्रसङ्गः →** एतत् व्याधस्य कथनम् । तेन अविचारितं कर्म कृतम् । सम्प्रति स रिक्तहस्तः आसीत् । मृगकच्छपौ मित्रप्रयासेण सम्प्रति व्याधपाशात् मुक्तौ आस्ताम् । इत्थं दृष्ट्वा लुब्धकः विचारयति ।

**अन्वयः →** यः (नरः) ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते तस्य (नरस्य) ध्रुवाणि नश्यन्ति (इति ध्रुवम् / सत्यम्), हि अध्रुवं नष्टम् एव ।

**शब्दार्थः व्याकरणञ्च →** यः = नरः । ध्रुवाणि = स्थिराणि । परित्यज्य → परि + √त्यज् + ल्यप् = हित्वा । अध्रुवाणि = अनिश्चितानि । तस्य = नरस्य । नश्यन्ति = विनश्यन्ति । अध्रुवम् → न ध्रुवम् = अनिश्चितम् । नष्टमेव → नष्टम् + एव = √नश् + क्त । हि = च, निश्चितम् ।

**तात्पर्यः →** निश्चितानि वस्तूनि परित्यागः न कर्तव्यम् । यतो हि अनिश्चितानि वस्तूनि पूर्वं एव नष्टानि सन्ति ।

14-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

14-08-2020

संस्कृतसामान्यम् । उपशास्त्री II

अनिवार्यपत्रम् । शब्दरूपम् ।

श्वन् (कुक्कुरः, कुत्ता), नकारान्त पुल्लिङ्गम् ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा – | श्वा | श्वानौ | श्वानः |
| द्वितीया – | श्वानम् | ,, | शुनः |
| तृतीया – | शुना | श्वभ्याम् | श्वभिः |
| चतुर्थी – | शुने | ,, | श्वभ्यः |
| पञ्चमी – | शुनः | ,, | ,, |
| षष्ठी – | ,, | शुनोः | शुनाम् |
| सप्तमी – | शुनि | ,, | श्वसु |
| सम्बोधन – | हे श्वन् ! | हे श्वानौ ! | हे श्वानः ! |

युवन् (युवा) पुल्लिङ्गम्

| | | | |
|---|---|---|---|
| प्रथमा वि० – | युवा | युवानौ | युवानः |
| द्वि० वि० – | युवानम् | ,, | यूनः |
| तृ० ,, – | यूना | युवभ्याम् | युवभिः |
| च० ,, – | यूने | ,, | युवभ्यः |
| पं० ,, – | यूनः | ,, | ,, |
| षष्ठी ,, – | ,, | यूनोः | यूनाम् |
| सप्त० ,, – | यूनि | ,, | युवसु |
| सम्बो० – | हे युवन् ! | हे युवानौ ! | हे युवानः ! |

14-08-2020

डॉ० निर्मल कुमार झा, (सं० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

अनिवार्यपत्रम् । शास्त्री II 14-08-2020

व्याकरणछात्रहेतवः । रघुवंशम् । श्लोकव्याख्या ।

"अस्त्रं हरादाप्तवता दुरापं येनेन्द्रलोकावजयाय दृप्तः ।
पुरा जनस्थानविमर्दशङ्की सन्धाय लङ्काधिपतिः प्रतस्थे ॥"

सन्दर्भः → प्रस्तुमिदं पद्यं कविकालिदासप्रणीतस्य षष्ठसर्गस्य इन्दुमतीस्वयंवरवर्णनाद् अवतरितम् अस्ति ।

प्रसङ्गः → पाण्ड्यनरेशस्य प्रभुत्वं कविरत्र सुनन्दामुखेन इन्दुमतीं प्रति प्रकाशयति ।

अन्वयः → पुरा जनस्थानविमर्दशङ्की दृप्तः लङ्काधिपतिः दुरापम् अस्त्रं हरात् आप्तवता येन सन्धाय इन्द्रलोकावजयाय प्रतस्थे ।

शब्दार्थः व्याकरणञ्च → पुरा = प्राक्, इन्द्रपुरीविजयसमये ।
जनस्थानविमर्दशङ्की → जनस्थानस्य विमर्दं शङ्कते इति = दण्डकारण्यविनाशभीतः । दृप्तः → √दृप् + क्त = उद्धतः, उदण्डः, दुर्दान्तः । लङ्काधिपतिः → लङ्कायाः अधिपतिः = रावणः । दुरापम् → दुः + आपम् = दुःसाध्यम् । अस्त्रं → √अस् + ष्ट्रन् = आयुधम् । हरात् = शङ्करात्, शिवात् । आप्तवता = प्राप्तवता । येन = पाण्ड्यनृपेण । सन्धाय = मैत्रिं विधाय । इन्द्रलोकावजयाय → इन्द्रस्य लोकस्य अवजयः, तस्मै = देवलोकं विजयाय । प्रतस्थे = प्रययौ ।

तात्पर्यः → दण्डकारण्यस्य विनाशशङ्कया शिवात् दुर्लभमस्त्रं लब्धवताऽनेन पाण्ड्येन साकं रावणोऽपि सन्धिं कृत्वा देवपुरीं जेतुं प्रययौ ।

विशेषः → अत्र श्लोके वीररसः, वैदर्भीरीतिः, प्रसादगुणः, अनुप्रासालङ्कारः, उपजातिवृत्तिञ्च ।

14-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।